# Varadaraja Stavah

# વરદરાજસ્તવઃ

## Document Information

Text title : Varadarajastavah

File name : varadarAjastavaH.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 23, 2019

*sanskritdocuments.org*

# વરદરાજસ્તવઃ

પઞ્ચસ્તવ્યાં ૪ વરદરાજસ્તવઃ

શ્રીવત્સચિહ્નમિશ્રેભ્યો નમ ઉક્તિમધીમહે ।
યદુક્તયસ્ત્રયીકણ્ઠે યાન્તિ મઙ્ગલ સૂત્રતામ્ ॥

સ્વસ્તિ હસ્તિગિરિમસ્તશેખરસ્સન્તનોતુ મયિ સન્તતં હરિઃ ।
નિસ્સમાભ્યધિકમભ્યધત્ત યં દેવમૌપનિષદી સરસ્વતી ॥ ૧॥

શ્રીનિધિં નિધિમપારમર્થિનામર્થિતાર્થપરિદાનદીક્ષિતમ્ ।
સર્વભૂતસુહૃદં દયાનિધિં દેવરાજમધિરાજમાશ્રયે ॥ ૨॥

નિત્યમિન્દ્રિયપથાતિગં મહો યોગિનામપિ સુદૂરગં ધિયઃ ।
અપ્યનુશ્રવશિરસ્સુ દુર્ગ્રહં પ્રાદુરસ્તિ કરિશૈલમસ્તકે ॥ ૩॥

વલ્લિકા શ્રુતિમતમલ્લિકામયી યેન પલ્લવિતવિશ્વશાખયા ।
સ્વશ્રિયા કરિગિરેરનુક્રિયાં વષ્ટિ મૃષ્ટવરદં તમાશ્રયે ॥ ૪॥

યં પરોક્ષમુપદેશતસ્ત્રયી નેતિ નેતિ પરપર્યુદાસતઃ ।
વક્તિ યસ્તમપરોક્ષમીક્ષયત્યેષ તં કરિગિરિં સમાશ્રયે ॥ ૫॥

એષ ઈશ ઇતિ નિર્ણયં ત્રયી ભાગધેયરહિતેષુ નો દિશેત્ ।
હસ્તિધામનિ ન નિર્ણયેત કો દેવરાજમયમીશ્વરસ્ત્વિતિ ॥ ૬॥

હૈ! કુદૃષ્ટ્યભિનિવિષ્ટચેતસાં નિર્વિશેષસવિશેષતાશ્રયમ્ ।
સંશયં કરિગિરિર્નુદત્યસૌ તુઙ્ગમઙ્ગલગુણાસ્પદે હરૌ ॥ ૭॥

ન્યાયતર્કમુનિમુખ્યભાષિતૈશ્શોધિતૈસ્સહ કથઞ્ચન ત્રયી ।
જોષયેદ્ધરિમનંહસો જનાન્ હસ્તિધામ સકલં જનં સ્વયમ્ ॥ ૮॥

અદ્ભુતં મહદસીમભૂમકં કિઞ્ચિદસ્તિ કિલ વસ્તુ નિસ્તુલમ્ ।
ઇત્યઘોષિ યદિદં તદગ્રતસ્તથ્યમેવ કરિધામ્નિ દૃશ્યતે ॥ ૯॥

સંવદેત કિલ યત્પ્રમાન્તૈરસ્તપ્રમાણમિતિ યે હિ મેનિરે ।

તન્મતેઽપિ કિલ માનતાં ગતા હસ્તિનાઽદ્ય પરવસ્તુનિ ત્રયી ॥ ૧૦॥

ગુણાયત્તં લોકે ગુણિષુ હિ મતં મઙ્ગલપદં
    વિપર્યસ્તં હસ્તિક્ષિતિધરપતે ! તત્ત્વયિ પુનઃ ।
ગુણાસ્સત્યજ્ઞાનપ્રભૃતય ઉત ત્વદ્ગતતયા
    શુભીભૂયં યાતા ઇતિ હિ નિરણૈષ્મ શ્રુતિવશાત્ ॥ ૧૧॥

નિરાબાધં નિત્યં નિરવધિ નિરંહો નિરુપમં
    સદા શાન્તં શુદ્ધં પ્રતિભટમવદ્યસ્ય સતતમ્ ।
પરં બ્રહ્મામ્નાતં શ્રુતિશિરસિ યત્ તદ્વરદ ! તે
    પરં રૂપં સાક્ષાત્તદિદમપદં વાઙ્મનસયોઃ ॥ ૧૨॥

પ્રશાન્તાનન્તાત્માનુભવજમહાનન્દમહિમ-
    પ્રસક્તસ્તૈમિત્યાનુકૃતવિતરઙ્ગાર્ણવદશમ્ ।
પરં યત્તે રૂપં સ્વસદૃશદરિદ્રં વરદ ! તત્
    ત્રયી પિસ્પ્રક્ષન્તી પરનિરસને શ્રામ્યતિ પરમ્ ॥ ૧૩॥

ન વક્તું ન શ્રોતું ન મનિતુમથોપાસિસિષિતું
    ન ચ દ્રષ્ટું સ્પ્રષ્ટું તદનુ ન ચ ભોક્તું હિ સૂશકમ્ ।
પરં યદ્વસ્તૂક્તં નનુ વરદ ! સાક્ષાત્તદસિ ભોઃ !
    કથં વિશ્વસ્મૈ ત્વં કરિગિરિપુરસ્તિષ્ઠસ ઇહ ॥ ૧૪॥

પ્રકૃષ્ટં વિજ્ઞાનં બલમતુલમૈશ્વર્યમખિલં
    વિમર્યાદં વીર્યં વરદ ! પરમા શક્તિરપિ ચ ।
પરં તેજશ્ચેતિ પ્રવરગુણષટ્કં પ્રથમજં
    ગુણાનાં નિસ્સીમ્નાં ગણનવિગુણાનાં પ્રસવભૂઃ ॥ ૧૫॥

ગુણૈઃ ષડ્ભિસ્ત્વેતૈઃ પ્રથમતરમૂર્તિસ્તવ બભૌ
    તતસ્તિસ્રસ્તેષાં ત્રિયુગ ! યુગલૈર્હિ ત્રિભિરભુઃ ।
વ્યવસ્થા યા ચૈષા નનુ વરદ ! સાઽઽવિષ્કૃતિવશાત્
    ભવાન્ સર્વત્રૈવ ત્વગણિતમહામઙ્ગલગુણઃ ॥ ૧૬॥

ઇયં વૈયૂહી વૈ સ્થિતિરથ કિલેચ્છાવિહૃતયે
    વિભૂતીનાં મધ્યે સુરનરતિરશ્ચામવતરન્ ।
સજાતીયસ્તેષામિતિ તુ વિભવાખ્યામપિ ભજન્
    કરીશ ! ત્વં પૂર્ણો વરગુણગણૈસ્તાન્ સ્થગયસિ ॥ ૧૭॥

પરો વા વ્યૂહો વા વિભવ ઉત વાઽર્ચાવિતરણો
    ભવન્ વાઽન્તર્યામી વરવરદ ! યો યો ભવસિ વૈ ।
સ સ ત્વં સન્નૈશાન્ વરગુણગણાન્ બિભ્રદખિલાન્
    ભજદ્ભ્યો ભાસ્યેવં સતતમિતરેભ્યસ્ત્વિતરથા ॥ ૧૮॥

દયાક્ષાન્ત્યૌદાર્યમ્રદિમસમતાસૌહૃદધૃતિ
    પ્રસાદપ્રેમાજ્ઞાશ્રિતસુલભતાદ્યા વરગુણાઃ ।
તથા સૌન્દર્યાદ્યાસ્તવ વરદરાજોત્તમગુણાઃ
    વિસીમાનોઽસઙ્ખ્યાઃ પ્રણતજનભોગં પ્રસુવતે ॥ ૧૯॥

અનન્યાધીનત્વં તવ કિલ જગુર્વૈદિકગિરઃ
    પરાધીનં ત્વાં તુ પ્રણતપરતન્ત્રં મનુમહે ।
ઉપાલમ્ભોઽયં ભોઃ ! શ્રયતિ બત સાર્વજ્ઞ્યમપિ તે
    યતો દોષં ભક્તેષ્વિહ વરદ ! નૈવાકલયસિ ॥ ૨૦॥

પાણિપાદવદનેક્ષણશબ્દૈઃ
    અમ્બુજાન્યપદિશન્ વરદ ! ત્વમ્ ।
બાહુભિસ્ત્વતિવિશાલતમાલાન્
        આઞ્જનં કરિગિરેરસિ શ‍ૃઙ્ગમ્ ॥ ૨૧॥

ત્વામુદારભુજમુન્નસમાયત્કર્ણપાશપરિકર્મસદંસમ્ ।
આયતાક્ષમભિજાતકપોલં પારણીયતિ વરપ્રદ ! દૃઙ્મે ॥ ૨૨॥

નીલમેઘનિભમઞ્જનપુઞ્જશ્યામકુન્તલમનન્તશયં ત્વામ્ ।
અબ્જપાણિપદમમ્બુજનેત્રં નેત્રસાત્કુરુ કરીશ ! સદા મે ॥ ૨૩॥

ત્વક્ચ દૃક્ચ નિપિપાસતિ જિહ્વા
    વિહ્વલા શ્રવણવત્પરવૃત્તૌ ।
નાસિકા ત્વયિ કરીશ ! તથેતિ
    પ્રાપ્નુયાં કથમિમાં સ્વિદવસ્થામ્ ॥ ૨૪॥

આધિરાજ્યમધિકં ભુવનાનાં
    ઈશ ! તે પિશુનયન્ કિલ મૌલિઃ ।
ચૂલિકામણિસહસ્રમરીચેઃ
        હસ્તિભૂષણ ! ભવત્યુદયાદ્રિઃ ॥ ૨૫॥

ઉદ્ધરત્યુપરિ ભક્તજનાનિત્યૂર્ધ્વતાશ્રયણસૂચિતશક્તિમ્ ।

ઊર્ધ્વપુણ્ડ્રતિલકં બહુમાનાત્ કિં બિભર્ષિ વરદ ! સ્વલલાટે ॥ ૨૬॥

કર્ણિકા તવ કરીશ ! કિમેષા
    કર્ણભૂષણમુતાંસવિભૂષા ।
અંસલમ્બ્યલકભૂષણમાહો !
    માનસસ્ય મમ વા પરિકર્મ ॥ ૨૭॥

પારિજાતવિટપાનભિતો યા
    પુષ્પસમ્પદુદિયાત્ કરિનાથ ।
તાં વિડમ્બયતિ તાવકબાહુષુ
    આતતા તુ કટકાઙ્ગદલક્ષ્મીઃ ॥ ૨૮॥

મથ્યમાનચલફેનિલસિન્ધુ
    પ્રોત્થિતિક્ષણદશાં ગમિતૌ તે ।
વક્ષસિ સ્ફુરિતમૌક્તિકહારે
    કૌસ્તુભશ્ચ કમલા ચ કરીશ ! ॥ ૨૯॥

અઞ્જનક્ષિતિભૃતો યદિ નામ
    ઉપત્યકા વરદ ! હેમમયી સ્યાત્ ।
તાદૃશી તવ વિભાતિ તુ લક્ષ્મીઃ
    આમ્બરી બત વિડમ્બિતવિદ્યુત્ ॥ ૩૦॥

પરભાગમિયાદ્રવેસ્તમિસ્રા
    વરદાદ્ય ત્વયિ તન્નિશામયામઃ ।
ગમિતા તવ વક્ત્રચિત્રભાનોઃ
    પરભાગં નનુ કૌન્તલી તમિસ્રા ॥ ૩૧॥

ઉભયોરપિ પક્ષયોસ્તિથિર્યા
    વિષમીભાવનિરાસદાઽષ્ટમીતિ ।
ઉપમાનજસમ્પદે હિ સેન્દોઃ
    વરદાભૂદ્ભવતો લલાટલક્ષ્મ્યા ॥ ૩૨॥

અલકાલિચિકીર્ષયા કિલાત્તા
    સુપરીચિક્ષિષયા લલાટપટ્ટે ।
સુમષી નિકષીકૃતા ભ્રુવૌ તે
    વરદ ! સ્યાદકૃતત્વતસ્તુ નૈવમ્ ॥ ૩૩॥

શ્રવસશ્ચ દૃશશ્ચ શબ્દરૂપગ્રહણે તે ન હિ જીવવદ્વ્યવસ્થા ।
ઉભયોરખિલેક્ષણક્ષમત્વાદ્વરદાતઃ ! શ્રવણાશ્રયે દૃશૌ તે ॥ ૩૪॥

કરુણારસવાહિવીક્ષણોર્મેર્વરદ ! પ્રેમમયપ્રવાહભાજઃ ।
તતતીરવનાવલી ભ્રુવૌ દૃક્ચલસિન્ધોસ્તવ નાસિકેવ સેતુઃ ॥ ૩૫॥

વિભવં વિવૃણોતિ વિસ્તૃણીતે
રુચમાવિષ્કુરુતે કૃપામપારામ્ ।
અભિવર્ષતિ હર્ષમાર્દ્રભાવં
તનુતે તે વરદૈષ દૃષ્ટિપાતઃ ॥ ૩૬॥

અરુણાધરપલ્લવે લસન્તી
વરદાસૌ દ્વિજચન્દ્રચન્દ્રિકા તે ।
અધિવિદ્રુમમસ્તનિસ્તલાલી
રુચમાવિષ્કુરુતે હિ પુષ્કરાક્ષ ! ॥ ૩૭॥

સ્મિતનિર્ઝરિકા વિનિષ્પતન્તી
તવ વક્ષઃસ્થલભૂતલે વિકીર્ણા ।
વરદ ! પ્રબિભર્તિ હારલક્ષ્મીં
અપિ મુક્તાવલિકા નદીવ તજ્જા ॥ ૩૮॥

પરિમણ્ડિતરાસમણ્ડલાભિર્વરદાઘ્રાતં અભીષ્ટગોપિકાભિઃ ।
અનુવર્તિતદાતનપ્રહર્ષાદિવ ફુલ્લં હિ કપોલયોર્યુગં તે ॥ ૩૯॥

મુખમુન્નસમાયતાક્ષમુદ્યત્સ્મિતદન્તં રુચિરાધરં નતભ્રુ ।
લસદંસવિલમ્બિકર્ણપાશં મયિ તે નિશ્ચલમસ્તુ હસ્તિનાથ ! ॥ ૪૦॥

પદ્માયાઃ પ્રણયરસાત્સમાસજન્ત્યાઃ
સ્વં બાહું સુબહુમતો ભુજેન તેન ।
કાં નામાન્વભવદહો ! દશાં તદાત્વે
કણ્ઠસ્તે કરિગિરિનાથ ! કમ્બુકાન્તઃ ॥ ૪૧॥

સાયામા ધૃતપરિણદ્ધયોઽબ્ધયો વા
તાદૃશ્યઃ સ્ફુટમથવા દિશશ્ચતસ્રઃ ।
ચત્વારો વરદ ! વરપ્રદાસ્ત્વદીયાઃ
ભાસન્તે ભુજપરિઘાસ્તમાલનીલાઃ ॥ ૪૨॥

આશ્લેષે વરદ ! ભુજાસ્તવેન્દિરાયાઃ

ગોપીનામભિમતરાસબન્ધને વા ।
બન્ધે વા મુદમધિકાં યશોદયાઽહો !
સંપ્રાપ્તાસ્તવ નવનીતમોષદોષાત્ ॥ ૪૩ ॥

સાલીયા ઇવ વિટપાસ્સપલ્લવાગ્રાઃ
કલ્લોલા ઇવ જલધેસ્સવિદ્રુમાગ્રાઃ ।
ભોગીદ્રા ઇવ ચ ફણામણીદ્ધવક્ત્રાઃ
ભાસન્તે વરદ ! ભુજાસ્તવારુણાગ્રાઃ ॥ ૪૪ ॥

અમ્ભોધેસ્સ્વયમભિમન્થનં ચકર્થ
ક્ષોણીધ્રં પુનરબિભશ્ચ સપ્તરાત્રમ્ ।
સપ્તાનાં વિવલયસિ સ્મ કણ્ઠમુક્ષ્ણામમ્લાના
વરદ ! તથાઽપિ પાણયસ્તે ॥ ૪૫ ॥

રિઙ્ખાતો વ્રજસદનાઙ્ગણેષુ કિં તે
ગોયષ્ટિગ્રહણવશાન્નુ ગોપગોષ્ઠ્યામ્ ।
આલમ્બાદ્ધયનયસૂત્રતોત્ત્રયોર્વા
પાણીનાં વરદ ! તવારુણત્વમાસીત્ ॥ ૪૬ ॥

સર્વજ્ઞાસ્સમુચિતશક્તયસ્સદૈવ
ત્વત્સેવાનિયમજુષસ્ત્વદેકભોગાઃ ।
હેતીનામધિપતયસ્સદા કિમેતાન્
શોભાર્થં વરદ ! બિભર્ષિ હર્ષતો વા ॥ ૪૭ ॥

કિં ધાતુર્ગગનવિધાનમાતૃકાઽભૂત્
વક્ષસ્તે વરદ ! વરેણ્ય ! યત્ર નામ ।
પદ્માયા મુખમથ કૌસ્તુભશ્ચ જાતૌ
ચન્દ્રાર્કાવુડુનિકરાયતે તુ હારઃ ॥ ૪૮ ॥

અણ્ડાનાં ત્વદુદરમામનન્તિ સન્તઃ
સ્થાનં તદ્વરદ ! કથં નુ કાર્શ્યમસ્ય ।
માહાત્મ્યં સ્વસ ઇહ યેષુ નૂનમેષાં
ઋદ્ધિસ્સ્યાન્મહિમકરી ન હીતરેષામ્ ॥ ૪૯ ॥

સૌન્દર્યામૃતરસવાહવેગજસ્સ્યાત્
આવર્તસ્તવ કિલ પદ્મનાભ ! નાભિઃ ।
તત્પદ્મં વરદ ! વિભાતિ કાન્તિમચ્યાઃ

લક્ષ્મ્યાસ્તે સકલવપુર્જુષો નુ સદ્મ ॥ ૫૦॥

યા દામોદર ઇતિ નામદા તવાસીત્
સા દામા કિલ કિણકારિણી બભૂવ ।
તન્નૂનં વરદ ! વલિત્રયચ્છલેન
ત્વન્મધ્યપ્રથમવિભૂષણી બભૂવ ॥ ૫૧॥

યાદૃગ્બીજાધ્યુષિતભુવિ યદ્વસ્તુ હસ્તીશ ! જાતં
તત્તાદૃક્ષં ફલતિ હિ ફલં ત્વય્યપીક્ષામહે તત્ ।
યસ્માદણ્ડાધ્યુષિત ઉદરે તાવકે જાયમાનં
પદ્મં પદ્માનન ! કિલ ફલત્યણ્ડષણ્ડાનખણ્ડાન્ ॥ ૫૨॥

અજ્ઞે યજ્ઞેશ્વર ! કિલ જને ક્વાપ્યદર્શં વિમર્શં
વિશ્વાધીશઃ કતમ ઇતિ તન્નિર્ણયં વર્ણયામઃ ।
વ્યાવક્રોશી નૃષુ સમુદિતા યાનુપાશ્રિત્ય તેઽપિ
બ્રહ્માદ્યાસ્તે વરદ ! જનિતાસ્તુન્દકન્દારવિન્દે ॥ ૫૩॥

મુષ્ણન્ કૃષ્ણઃ પ્રિયનિજજનૈર્જય્યહૈયઙ્ગવીનં
દામ્ના ભૂમ્ના વરદ ! હિ યયા ત્વં યશોદાકરાભ્યામ્ ।
બદ્ધો બન્ધક્ષપણકરણીં તાં કિલાદ્યાપિ માતુઃ
પ્રેમ્ણા ગાત્રાભરણમુદરાબન્ધનાખ્યં બિભર્ષિ ॥ ૫૪॥

સૌન્દર્યાખ્યા સરિદુરસિ વિસ્તીર્ય મધ્યાવરુદ્ધા
સ્થાનાલ્પત્વાદ્વિષમગતિજાવર્તગર્તાભનાભિઃ ।
પ્રાપ્ય પ્રાપ્તપ્રથિમ જઘનં વિસ્તૃતા હસ્તિનાથ !
સ્રોતોભેદં ભજતિ ભવતઃ પાદદેશાપદેશાત્ ॥ ૫૫॥

રમ્ભાસ્તમ્ભાઃ કરિવરકરાઃ કારભાસ્સારભાજો
વેષાશ્વેષા અપિ મરતકસ્તમ્ભમુખ્યાસ્તુલાખ્યાઃ ।
સામ્યં સમ્યગ્વરદ ! ન દધુસ્સર્વમુર્વોસ્ત્વદૂર્વોઃ
ન હ્યૈશ્વર્યં દધતિ ન તથા યૌવનારમ્ભજૃમ્ભાઃ ॥ ૫૬॥

યા તે ગાત્રે વરદ ! જનિતા કાન્તિમય્યાપગાઽભૂત્
તસ્યાસ્સ્રોતોયુગલમિહ યદ્યાતિ પાદપ્રવાદમ્ ।
તજ્જાતોર્ધ્વભ્રમિયુગમિવોદ્ભાનુની જાનુની તે
સ્યાદુક્ષ્ણોર્વા કકુદયુગલં યૌવનૈશ્વર્યનામ્નોઃ ॥ ૫૭॥

પ્રેમ્ણાઽઽઘ્રાતું કરિગિરિશિરોઽધોમુખીભાવભાજોઃ
    અઙ્ઘ્રિદ્વન્દ્વાહ્વયકમલયોર્દણ્ડકાણ્ડાયમાને ।
અદ્રિસ્પર્શોદ્ભવસુખત ઉત્કણ્ટકે રોમહર્ષાત્
    દ્રષ્ટુર્દૃષ્ટિર્વરદ ! કિમલં લઙ્ઘિતું જઙ્ઘિકે તે ॥ ૫૮॥

ભક્તાનાં યદ્વપુષિ દહરં પણ્ડિતં પુણ્ડરીકં
    યચ્ચામ્લાનં વરદ ! સતતાધ્યાસનાદાસનાબ્જમ્ ।
આમ્નાયાનાં યદપિ ચ શિરો યશ્ચ મૂર્ધા શઠારેઃ
    હસ્ત્યદ્રેર્વા કિમતિસુખદં તેષુ પાદાબ્જયોસ્તે ॥ ૫૯॥

પદ્યાસ્વદ્યાઙ્ગુલિષુ વરદ ! પ્રાન્તતઃ કાન્તિસિન્ધોઃ
    વીચીવીથીવિભવમુભયીષ્વમ્ભસો લમ્ભિતાસુ ।
વિન્દન્નિન્દુઃ પ્રતિફલનજાં સમ્પદં કિં પદં તે
    છાયાચ્છદ્મા નખવિતતિતાં લમ્ભિતશ્શુમ્ભિતસ્સન્ ॥ ૬૦॥

શમ્ભોરમ્ભોરુહમુખ ! સખા સન્ સહાઙ્કુશ્શશાઙ્કઃ
    કુર્વન્ સેવાં વરદ ! વિકલો વૃત્તહીનસ્સુવક્રઃ ।
ત્વત્પાદાબ્જે પ્રિયમખ ! નખચ્છદ્મનાઽઽશ્રિત્ય નિત્યં
    સદ્વૃત્તોઽભૂત્સ ચ દશગુણઃ પુષ્કલો નિષ્કલઙ્કઃ ॥ ૬૧॥

ત્વત્પાદાબ્જે પ્રજાતા સુરસરિદભવત્પ્રાક્ ચતુર્ધા તતસ્તાસુ
    એકાં ધત્તે ધ્રુવસ્સા ત્રિભુવનમપુનાત્ત્રીન્પથો ભાવયન્તી ।
તત્રૈકા ખં વ્રજન્તી શિવયતિ તુ શિવં સા પુનસ્સપ્તધાઽભૂત્
    તાસ્વેકા ગાં પુનાના વરદ ! સગરજસ્વર્ગસર્ગં ચકાર ॥ ૬૨॥

પરિજનપરિબર્હા ભૂષણાન્યાયુધાનિ
    પ્રવરગુણગણાશ્ચ જ્ઞાનશક્ત્યાદયસ્તે ।
પરમપદમથાણ્ડાન્યાત્મદેહસ્તથાઽઽત્મા
    વરદ ! સકલમેતત્ સંશ્રિતાર્થં ચકર્થ ॥ ૬૩॥

અનાપ્તં હ્યાપ્તવ્યં ન તવ કિલ કિઞ્ચિદ્વરદ ! તે
    જગજ્જન્મસ્થેમપ્રલયવિધયો ધીવિલસિતમ્ ।
તથાઽપિ ક્ષોદીયસ્સુરનરકુલેષ્વાશ્રિતજનાન્
    સમાશ્લેષ્ટું પેષ્ટું તદસુખકૃતાં ચાવતરસિ ॥ ૬૪॥

વિવેકધિયમેકતો હ્યભિનિવેશલેશો હરેત્
    મહત્ત્વભિનિવેશનં કિમુત તન્મહિમ્નસ્તવ ।

અહો ! વિસદૃશે જગત્યવતતર્થ પાર્થાદિકં
    નિજં જનમુદઞ્ચયન્ વરદ ! તં સમાશ્લેષકઃ ॥ ૬૫॥

સંશ્લેષે ભજતાં ત્વરાપરવશઃ કાલેન સંશોધ્ય તાન્
    આનીય સ્વપદે સ્વસઙ્ગમકૃતં સોઢું વિલમ્બં બત ! ।
અક્ષામ્યન્ ક્ષમિણાં વરો વરદ ! સન્નત્રાવતીર્ણો ભવેઃ
    કિં નામ ત્વમસંશ્રિતેષુ વિતરન્ વેષં વૃણીષે તુ તાન્ ॥ ૬૬॥

વરદ ! યદિ ન ભુવ્યવાતરિષ્યઃ
    શ્રુતિવિહિતાસ્ત્વદુપાસનાર્ચનાદ્યાઃ ।
કરણપથવિદૂરગે સતિ ત્વયિ
    અવિષયતાનિકૃતાઃ કિલાભવિષ્યન્ ॥ ૬૭॥

યદપરાધસહસ્રમજસ્રજં
    ત્વયિ શરણ્ય ! હિરણ્ય ઉપાવહત્ ।
વરદ ! તેન ચિરં ત્વમવિક્રિયો
    વિકૃતિમર્ભકનિર્ભજનાદગાઃ ॥ ૬૮॥

ત્વામામનન્તિ કવયઃ કરુણામૃતાબ્ધે !
    જ્ઞાનક્રિયાભજનલભ્યમલભ્યમન્યૈઃ ।
એતેષુ કેન વરદોત્તરકોસલસ્થાઃ
    પૂર્વં સદૂર્વમભજન્ત હિ જન્તવસ્ત્વામ્ ॥ ૬૯॥

ભજત્સુ વાત્સલ્યવશાત્ સમુત્સુકઃ
    પ્રકામમત્રાવતરેર્વરપ્રદ ! ।
ભવેશ્ચ તેષાં સુલભોઽથ કિઞ્ચિદં
        યદઙ્ગ દામ્ના નિયતઃ પુરાઽરુદઃ ॥ ૭૦॥

નરસિંહતનુરગૌણી સમસમયસમુદ્ભવશ્ચ ભક્તગિરઃ ।
સ્તમ્ભે ચ સમ્ભવસ્તે પિશુનયતિ પરેશતાં વરદ ! ॥ ૭૧॥

તાપત્રયીમયદવાનલદહ્યમાનં
    મુહ્યન્તમન્તમવયન્તમનન્ત ! નૈવ ।
સ્થાતું પ્રયાતુમુપયાતુમનીશમીશ !
    હસ્તીશ ! દૃષ્ટ્યમૃતવૃષ્ટિભિરાભજેથાઃ ॥ ૭૨॥

નાનાવિરુદ્ધવિદિશાસુ દિશાસુ ચાહો

વન્ધ્યૈર્મનોરથશતૈર્યુગપદ્વિકૃષ્ટઃ ।
ત્વત્પાદયોરનુદિતસ્પૃહ એષ સોઽહં
ન સ્વસ્તિ હસ્તિગિરિનાથ ! નિશામયામિ ॥ ૭૩॥

હૈ ! નિર્ભયોઽસ્મ્યવિનયોઽસ્મિ યતસ્ત્વદઙ્ઘ્રૌ
લિપ્સામલબ્ધવતિ ચેતસિ દુર્વિનીતે ।
દુષ્કર્મવર્મપરિકર્મિત એષ સોઽહં
અગ્રે વરપ્રદ ! તવ પ્રલપામિ કિઞ્ચિત્ ॥ ૭૪॥

સવ્યાધિરાધિરવિતુષ્ટિરનિષ્ટયોગઃ
સ્વાભીષ્ટભઞ્જનમમર્ષકરો નિકર્ષઃ ।
કૃન્તન્તિ સન્તતમિમાનિ મનો મદીયં
હસ્તીશ ! ન ત્વદભિલાષનિધિપ્રહાણિઃ ॥ ૭૫॥

વિદ્વેષમાનમદરાગવિલોભમોહાદિ
આજાનભૂમિરહમત્ર ભવે નિમજ્જન્ ।
નિર્દ્વન્દ્વ ! નિત્યનિરવદ્યમહાગુણં ત્વાં
હસ્તીશ ! કશ્શ્રયિતુમીક્ષિતુમીપ્સિતું વા ॥ ૭૬॥

પુત્રાદયઃ કથમમી મયિ સંસ્થિતે સ્યુઃ
ઇત્યપ્રતિક્રિયનિરર્થકચિન્તનેન ।
દૂયે ન તુ સ્વયમહં ભવિતાઽસ્મિ કીદૃક્
ઇત્યસ્તિ હસ્તિગિરિનાથ ! વિમર્શલેશઃ ॥ ૭૭॥

શમ્પાચલં બહુલદુઃખમનર્થહેતુઃ
અલ્પીય ઇત્યપિ વિમૃષ્ટિષુ દૃષ્ટદોષમ્ ।
દુર્વાસનાદ્રઢિમતસ્સુખમિન્દ્રિયોત્થં
હાતું ન મે મતિરલં વરદાધિરાજ ! ॥ ૭૮॥

બુદ્ધ્વા ચ નો ચ વિહિતાકરણૈર્નિષિદ્ધ-
સંસેવનૈસ્ત્વદપચારશતૈરસહ્યૈઃ ।
ભક્તાગસામપિ શતૈર્ભવતાઽપ્યગણ્યૈઃ
હસ્તીશ ! વાક્તનુમનોજનિતૈર્હતોઽસ્મિ ॥ ૭૯॥

ત્વદ્દાસ્યમસ્ય હિ મમ સ્વરસપ્રસક્તં
તચ્ચોરયન્નયમહં કિલ ચસ્ખલ પ્રાક્ ।
ત્વં મામકીન ઇતિ મામભિમન્યસે સ્મ

હસ્તીશ ! સંશયથ નસ્તમિમં વિવાદમ્ ॥ ૮૦॥

ભોગા ઇમે વિધિશિવાદિપદં ચ કિઞ્ચ
સ્વાત્માનુભૂતિરિતિ યા કિલ મુક્તિરુક્તા ।
સર્વં તદૂષજલજોષમહં જુષેય
હસ્ત્યદ્રિનાથ ! તવ દાસ્યમહારસજ્ઞઃ ॥ ૮૧॥

વિષયવિષધરવ્રજવ્યાકુલે
જનનમરણનક્રચક્રાસ્પદે ।
અગતિરશરણો ભવાબ્ધૌ લુઠન્
વરદ ! શરણમિત્યહં ત્વાં વૃણે ॥ ૮૨॥

અકૃતસુકૃતકસ્સુદુષ્કૃત્તરઃ
શુભગુણલવલેશદેશાતિગઃ ।
અશુભગુણપરસ્સહસ્રાવૃતો
વરદમુરુદયં ગતિં ત્વાં વૃણે ॥ ૮૩॥

શરણવરણવાગિયં યોદિતા
ન ભવતિ બત ! સાઽપિ ધીપૂર્વિકા ।
ઇતિ યદિ દયનીયતા મય્યહો !
વરદ ! તવ ભવેત્તતઃ પ્રાણિમિ ॥ ૮૪॥

નિરવધિષુ કૃતેષુ ચાગસ્સ્વહો !
મતિરનુશયિની યદિ સ્યાત્તતઃ ।
વરદ ! હિ દયસે ન સંશેમહે
નિરનુશયધિયો હતા હૈ ! વયમ્ ॥ ૮૫॥

શરણવરણવાગિયં યાઽદ્ય મે
વરદ ! તદધિકં ન કિઞ્ચિન્મમ ।
સુલભમભિમતાર્થદં સાધનં
તદયમવસરો દયાયાસ્તવ ॥ ૮૬॥

વિષયવિષયિણી સ્પૃહા ભૂયસી
તવ તુ ચરણયોર્ન સાઽલ્પાપિ મે ।
વરદ ! નનુ ભરસ્તવૈવ ત્વયં
યદુત તવ પદસ્પૃહાજન્મ મે ॥ ૮૭॥

ઇયમિહ મતિરસ્મદુજ્જીવની
    વરદ ! તવ ખલુ પ્રસાદાદૃતે ।
શરણમિતિ વચોઽપિ મે નોદિયાત્
    ત્વમસિ મયિ તતઃ પ્રસાદોન્મુખઃ ॥ ૮૮॥

વરદ ! યદિહ વસ્તુ વાઞ્છામ્યહં
    તવ ચરણલભાવિરોધસ્તતઃ ।
યદિ ન ભવતિ તચ્ચ દેહિ પ્રભો !
    ઝટિતિ વિતર પાદમેવાન્યથા ॥ ૮૯॥

તદપિ કિમપિ હન્ત ! દુર્વાસના-
    શતવિવશતયા યદભ્યર્થયે ।
તદતુલદય ! સાર્વ ! સર્વપ્રદ !
    પ્રવિતર વરદ ! ક્ષમામ્ભોનિધે ॥ ૯૦॥

પ્રિયમિતરદથાપિ વા યદ્યથા
    વિતરસિ વરદ ! પ્રભો ! ત્વં હિ મે ।
તદનુભવનમેવ યુક્તં તુ મે
    ત્વયિ નિહિતભરોઽસ્મિ સોઽહં યતઃ ॥ ૯૧॥

યથાઽસિ યાવાનસિ યોઽસિ યદ્ગુણઃ
    કરીશ ! યાદૃગ્વિભવો યદિઙ્ગિતઃ ।
તથાવિધં ત્વાઽહમભક્તદુર્ગ્રહં
    પ્રપત્તિવાચૈવ નિરીક્ષિતું વૃણે ॥ ૯૨॥

અયે ! દયાલો ! વરદ ! ક્ષમાનિધે !
    વિશેષતો વિશ્વજનીન ! વિશ્વદ ! ।
હિતજ્ઞ ! સર્વજ્ઞ ! સમગ્રશક્તિક !
    પ્રસહ્ય માં પ્રાપય દાસ્યમેવ તે ॥ ૯૩॥

સ્વકૈર્ગુણૈઃ સ્વૈશ્વરિતૈઃ સ્વવેદનાત્
    ભજન્તિ યે ત્વાં ત્વયિ ભક્તિતોઽથવા ।
કરીશ ! તેષામપિ તાવકી દયા
    તથાત્વકૃત્સૈવ તુ મે બલં મતમ્ ॥ ૯૪॥

યદિ ત્વભક્તોઽપ્યગુણોઽપિ નિષ્ક્રિયો
    નિરુદ્યમો નિષ્કૃતદુષ્કૃતો ન ચ ।

લભેય પાદૌ વરદ ! સ્ફુટાસ્તતઃ
    ક્ષમાદયાદ્યાસ્તવ મઙ્ગલા ગુણાઃ ॥ ૯૫॥

વિલોકનૈર્વિભ્રમણૈરપિ ભ્રુવોઃ
    સ્મિતામૃતૈરિઙ્ગિતમઙ્ગલૈરપિ ।
પ્રચોદિતસ્તે વરદ ! પ્રહૃષ્ટધીઃ
    કદા વિધાસ્યે વરિવસ્યનં તવ ॥ ૯૬॥

વિવિશ્ય વિશ્વેન્દ્રિયતર્ષકર્ષણીઃ
    મનસ્સ્થલે નિત્યનિખાતનિશ્ચલાઃ ।
સુધાસખીર્હસ્તિપતે ! સુશીતલાઃ
    ગિરઃ શ્રવસ્યાશ્શ઼ૃણુયામ તાવકીઃ ॥ ૯૭॥

અશેષદેશાખિલકાલયોગિનીષુ
    અહં ત્વવસ્થાસ્વખિલાસ્વનન્યધીઃ ।
અશેષદાસ્યૈકરતિસ્તદાચરન્
    કરીશ ! વર્તેય સદા ત્વદન્તિકે ॥ ૯૮॥

ઇમં જનં હન્ત ! કદાઽભિષેક્ષ્યતિ
    ત્વદક્ષિનદ્યોર્વરદ ! શ્રમાપહા ।
અકૃત્રિમપ્રેમરસપ્રવાહજા
    વિસૃત્વરી વીક્ષણવીચિસન્તતિઃ ॥ ૯૯॥

સદાતનત્વેઽપિ તદાતનત્વત્
    નવીભવત્પ્રેમરસપ્રવાહયા ।
નિષેવિતં ત્વાં સતતોત્કયા શ્રિયા
    કરીશ ! પશ્યેમ પરશ્શતં સમાઃ ॥ ૧૦૦॥

સમાહિતૈસ્સાધુ સનન્દનાભિઃ
    સુદુર્લભં ભક્તજનૈરદુર્લભમ્ ।
અચિન્ત્યમત્યદ્ભુતમપ્રતર્કણં
    વરપ્રદ ત્વત્પદમાપ્નુયાં કથમ્ ? ॥ ૧૦૧॥

રામાનુજાઙ્ઘ્રિશરણોઽસ્મિ કુલપ્રદીપઃ
    ત્વાસીત્સ યામુનમુનેસ્સ ચ નાથવંશ્યઃ ।
વંશ્યઃ પરાઙ્કુશમુનેસ્સ ચ સોઽપિ દેવ્યાઃ
    દાસસ્તવેતિ વરદાસ્મિ તવેક્ષણીયઃ ॥

॥ ઇતિ પઞ્ચસ્તવ્યાં ચતુર્થો વરદરાજસ્તવઃ સમાપ્તઃ ॥

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Varadaraja Stavah*

pdf was typeset on November 23, 2019

Please send corrections to *sanskrit@cheerful.com*